## ॥ श्री हनुमत् कवचम् ॥
## 卐 Shri Hanumat Kavch 卐

**॥ ॐ गण गणपतये नमः ॥**

**॥ ॐ श्री हनुमते नमः ॥**

ॐ अस्य श्री हनुमत्कवच स्तोत्र महामन्त्रस्य,
श्री रामचन्द्र ऋषिः । श्री हनुमान् परमात्मा देवता ।
अनुष्टुप् छन्दः । मारुतात्मजेति बीजं ।
अञ्जनीसूनुरिति शक्तिः । लक्ष्मणप्राणदातेति कीलकं ।
रामदूतायेत्यस्त्रं । हनुमान् देवता इति कवचं ।
पिङ्गाक्षोमित विक्रम इति मन्त्रः । श्रीरामचन्द्र प्रेरणया रामचन्द्र
प्रीत्यर्थं मम सकल कामना सिद्ध्यर्थं जपे विनियोगः ॥

**॥ करन्यासः ॥**

ॐ हां अञ्जनीसुताय अङ्गुष्ठाभ्यां नमः ।
ॐ हीं रुद्र मूर्तये तर्जनीभ्यां नमः ।
ॐ हूं रामदूताय मध्यमाभ्यां नमः ।
ॐ हैं वायुपुत्राय अनामिकाभ्यां नमः ।
ॐ हौं अग्निगर्भाय कनिष्ठिकाभ्यां नमः ।
ॐ हः ब्रह्मास्त्र निवारणाय करतल करपृष्ठाभ्यां नमः ॥

**॥ अङ्गन्यासः ॥**

ॐ हां अञ्जनीसुताय हृदयाय नमः ।
ॐ हीं रुद्र मूर्तये शिरसे स्वाहा ।
ॐ हूं रामदूताय शिकायै वषट् ।
ॐ हैं वायुपुत्राय कवचाय हुं ।
ॐ हौं अग्निगर्भाय नत्रत्रयाय वौषट् ।
ॐ हः ब्रह्मास्त्र निवारणाय अस्त्राय फट् ।
भूर्भुवःसुवरोमिति दिग्बन्धः ॥

## ॥ अथ ध्यानम् ॥

ध्यायेत्बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्र प्रमुखं प्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादि समस्तवानरयुतं सुव्यक्त तत्त्वप्रियं
संसक्तारुण लोचनं पवनजं पीताम्बरालङ्कृतं ॥ १ ॥

उद्यन् मार्ताण्डकोटि प्रकट रुचियुतं चारुवीरासनस्थं
मौञ्जी यज्ञोपवीताभरण रुचिशिखं शोभितं कुण्डलाङ्गं ।
भक्तानामिष्टदं तं प्रणतमुनिजनं वेदनाद प्रमोदं ध्यायेदेवं
विधेयं प्लवग कुलपतिं गोष्पदीभूत वार्धिं ॥ २ ॥

वज्राङ्गं पिङ्गकेशाढ्यं स्वर्णकुण्डल
मण्डितंनिगूढमुपसङ्गम्य पारावार पराक्रमं ॥ ३ ॥
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिं ।
कुण्डल द्वय संशोभिमुखाम्भोजं हरिं भजे ॥ ४ ॥
सव्यहस्ते गदायुक्तं वामहस्ते कमण्डलुं ।
उद्यद् दक्षिण दोर्दण्डं हनुमन्तं विचिन्तयेत् ॥ ५ ॥

## ॥ अथ मन्त्रः ॥

ॐ नमो हनुमते शोभिताननाय यशोलङ्कृताय अञ्जनीगर्भ सम्भूताय ।
राम लक्ष्मणानन्दकाय । कपिसैन्य प्रकाशन पर्वतोत्पाटनाय ।
सुग्रीवसाह्यकरण परोच्चाटन । कुमार ब्रह्मचर्य । गम्भीर शब्दोदय ।
ॐ ह्रीं सर्वदुष्टग्रह निवारणाय स्वाहा ।

ॐ नमो हनुमते एहि एहि । सर्वग्रह भूतानां शाकिनी डाकिनीनां
विशमदुष्टानां सर्वेषामाकर्षयाकर्षय । मर्दय मर्दय । छेदय छेदय ।
मर्त्यान् मारय मारय । शोषय शोषय । प्रज्वल प्रज्वल । भूत मण्डल
पिशाचमण्डल निरसनाय । भूतज्वर प्रेतज्वर चातुर्थिकज्वर ब्रह्मराक्षस पिशाचः
छेदनः क्रिया विष्णुज्वर । महेशज्वरं छिन्धि छिन्धि । भिन्धि भिन्धि ।
अक्षिशूले शिरोभ्यन्तरे ह्यक्षिशूले गुल्मशूले पित्तशूले ब्रह्म राक्षसकुल
प्रबलनागकुलविष निर्विषझटितिझटिति । ॐ ह्रीं फट् घेकेस्वाहा ।

ॐ नमो हनुमते पवनपुत्र वैश्वानरमुख पापदृष्टि शोदा दृष्टि हनुमते घो अज्ञापुरे स्वाहा ।स्वगृहे द्वारे पट्टके तिष्ठतिष्ठेति तत्र रोगभयं राजकुलभयं नास्ति ।तस्योच्चारण मात्रेण सर्वे ज्वरा नश्यन्ति ।ॐ ह्रां ह्रीं ह्रूं फट् घेघेस्वाहा ।

**॥ श्री रामचन्द्र उवाच ॥**

हनुमान् पूर्वतः पातु दक्षिणे पवनात्मजः ।
अधस्तु विष्णु भक्तस्तु पातु मध्यं च पावनिः ॥१॥
लङ्का विदाहकः पातु सर्वापद्भ्यो निरन्तरं ।
सुग्रीव सचिव : पातु मस्तकं वायुनन्दनः ॥२॥

भालं पातु महावीरो भृवोर्मध्ये निरन्तरं ।
नेत्रे छायापहारी च पातु नः प्लवगेश्वरः ॥३॥
कपोले कर्णमूले च पातु श्रीरामकिङ्करः ।
नासाग्रं अञ्जनीसूनुः पातु वक्त्रं हरीश्वरः ॥४॥

वाचं रुद्रप्रियः पातु जिह्वां पिङ्गल लोचनः ।
पातु देवः फाल्गुनेष्टः चिबुकं दैत्यदर्पहा ॥५॥
पातु कण्ठं च दैत्यारिः स्कन्धौ पातु सुरार्चितः ।
भुजौ पातु महातेजाः करौ च चरणायुधः ॥६॥

नगरन् नखायुधः पातु कुक्षौ पातु कपीश्वरः ।
वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः ॥७॥
लङ्का निभञ्जनः पातु पृष्ठदेशे निरन्तरं ।
नाभिं च रामदूतस्तु कटिं पात्वनिलात्मजः ॥८॥

गुह्यं पातु महाप्राज्ञो लिङ्गं पातु शिवप्रियः ।
ऊरू च जानुनी पातु लङ्काप्रसाद भञ्जनः ॥९॥
जङ्घे पातु कपिश्रेष्ठोः गुल्फौ पातु महाबलः ।
अचलोद्धारकः पातु पादौ भास्कर सन्निभः ॥१०॥

अङ्गान्यमित सत्वाढ्यः पातु पादरङ्गुलीस्तथा ।
सर्वाङ्गानि महाशूरः पातु रोमाणि चाक्मवित् ॥११॥
हनुमत् कवचं यस्तु पठेद् विद्वान् विचक्षणः ।
स एव पुरुषश्रेष्ठो भुक्तिं मुक्तिं च विन्दति ॥१२॥

त्रिकालमेककालं वा पठेन् मासत्रयं नरः ।
सर्वान् रिपून् क्षणान् जित्वा स पुमान् श्रियमाप्नुयात् ॥१३॥

**॥ इति श्री हनुमत्कवचं सम्पूर्णं ॥**

allastrologysolutions.com